Bheṣajam : Remedy

VI.57.3 May ours be the weal and the happiness. And may we not suffer from any disease. May the foreign matter (causing disease) calm down. May all the things be remedy to us; may everything be remedy to us.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५८) यशप्राप्त्यर्थं सूक्तम्

(१-३) दृष्टस्यास्य सूक्तस्यार्षी ऋषिः । बृहस्पतिर्मन्त्रोक्ता वा देवताः । (१) प्रथमर्चौ जगती, (२) द्वितीयायाः प्रस्तारपङ्क्तिः, (३) तृतीयायाश्चानुष्टुप् छन्दांसि ॥

यशसं मेन्द्रो मघवान्कृणोतु यशसं द्यावापृथिवी उभे इमे ।
यशसं मा देवः सविता कृणोतु प्रियो दातुर्दक्षिणाया इह स्याम् ॥१॥
यथेन्द्रो द्यावापृथिव्योर्यशस्वान्यथाप ओषधीषु यशस्वतीः ।
एवा विश्वेषु देवेषु वयं सर्वेषु यशसः स्याम ॥२॥
यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत ।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः ॥३॥

यशसम् । मा । इन्द्रः । मघऽवान् । कृणोतु । यशसम् । द्यावापृथिवी इति । उभे इति । इमे इति ।
यशसम् । मा । देवः । सविता । कृणोतु । प्रियः । दातुः । दक्षिणायाः । इह । स्याम् ॥ १ ॥
यथा । इन्द्रः । द्यावापृथिव्योः । यशस्वान् । यथा । आपः । ओषधीषु । यशस्वतीः ।
एव । विश्वेषु । देवेषु । वयम् । सर्वेषु । यशसः । स्याम ॥ २ ॥
यशाः । इन्द्रः । यशाः । अग्निः । यशाः । सोमः । अजायत ।
यशाः । विश्वस्य । भूतस्य । अहम् । अस्मि । यशःऽतमः ॥ ३ ॥

(५९) एकोनषष्टितमं सूक्तम्

(१-३) दृष्टस्यास्य सूक्तस्यार्षी ऋषिः । रुद्रो मन्त्रोक्ता वा देवताः । अनुष्टुप् छन्दः ॥

अनड्वद्भ्यस्त्वं प्रथमं धेनुभ्यस्त्वमरुन्धति ।
अधेनवे वयसे शर्म यच्छ चतुष्पदे ॥१॥
शर्म यच्छत्वोषधिः सह देवीररुन्धती ।
करत्पयस्वन्तं गोष्ठमयक्ष्मौ उत पूरुषान् ॥२॥
विश्वरूपां सुभगामच्छावदामि जीवलाम् ।
सा नो रुद्रस्यास्तां हेतिं दूरं नयतु गोभ्यः ॥३॥

अनड्वत्ऽभ्यः । त्वम् । प्रथमम् । धेनुऽभ्यः । त्वम् । अरुन्धति ।
अधेनवे । वयसे । शर्म । यच्छ । चतुःऽपदे ॥ १ ॥
शर्म । यच्छतु । ओषधिः । सह । देवीः । अरुन्धती ।
करत् । पयस्वन्तम् । गोऽस्थम् । अयक्ष्मान् । उत । पुरुषान् ॥ २ ॥
विश्वऽरूपाम् । सुऽभगाम् । अच्छऽआवदामि । जीवलाम् ।
सा । नः । रुद्रस्य । अस्ताम् । हेतिम् । दूरम् । नयतु । गोभ्यः ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

As in the Verses

VI.58.1 May the bounteous resplendent Lord make me glorious; glorious both the heaven and earth. May the impeller Lord make me glorious. May I become the pleasing donor of gifts.

VI.58.2 Just as the resplendent one is glorious on the terrestrial and celestial firmaments; as the waters (have become famous among the remedies), are glorious in the plants; so among all the enlightened ones and among all men, may we become glorious.

VI.58.3 The resplendent Lord is glorious; glorious is the adorable one, the blissful one is glorious. May I become the most glorious with the glory of all the beings.

Arundhati etc.

VI.59.1 O unobstructing herb (Arundhati, sahadevī or silāci), may you grant comfort first of all to our bullocks (anadvān) and milch-cows (dhenu) and also to non-milch quadrupeds less than five years old (vayase).

VI.59.2 May the unobstructing herb sahadevi grant comfort. May it make our cow-stall rich in milk and our men free from consumption.

VI.59.3 I praise the life-giving (herb), having all sorts of forms and bringing good fortune. May it turn the missile hurled by the terrible punisher (rudra) away far from our cattle.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१०) षष्टितमं सूक्तम्

(१-२) तृचस्यास्य सूक्तस्यार्षी ऋषिः । अर्यमा देवता । अनुष्टुप् छन्दः ॥

अयमा यात्यर्यमा पुरस्ताद्विषितस्तुपः ।
अस्या इच्छन्नग्रुवै पतिमुत जायामजानये ॥१॥
अश्रमदियमर्यमन्नन्यासां समनं यती ।
अङ्गो न्वर्यमन्नस्या अन्याः समनमार्यति ॥२॥
धाता दाधार पृथिवीं धाता द्यामुत सूर्यम् ।
धातास्या अग्रुवै पतिं दधातु प्रतिकाम्यम् ॥३॥

अयम् । आ । याति । अर्यमा । पुरस्तात् । विसितऽस्तुपः ।
अस्यै । इच्छन् । अग्रुवै । पतिम् । उत । जायाम् । अजानये ॥ १ ॥
अश्रमत् । इयम् । अर्यमन् । अन्यासाम् । समनम् । यती ।
अङ्गो इति । नु । अर्यमन् । अस्याः । अन्याः । समनम् । आऽअर्यति ॥ २ ॥
धाता । दाधार । पृथिवीम् । धाता । द्याम् । उत । सूर्यम् ।
धाता । अस्यै । अग्रुवै । पतिम् । दधातु । प्रतिऽकाम्यम् ॥ ३ ॥

(६१) एकषष्टितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्यार्षी ऋषिः । रुद्रो देवता । (१) प्रथमर्चोस्त्रिष्टुप्, (२-३) द्वितीयातृतीययोश्च भुरिक्त्रिष्टुप् छन्दसी ॥

मह्यमापो मधुमदेरयन्तां मह्यं सूरो अभरज्ज्योतिषे कम् ।
मह्यं देवा उत विश्वे तपोजा मह्यं देवः सविता व्यचो धात् ॥१॥
अहं विवेच पृथिवीमुत द्यामहमृतूंरजनयं सप्त साकम् ।
अहं सत्यमनृतं यद्वदाम्यहं दैवीं परि वाचं विशश्च ॥२॥
अहं जजान पृथिवीमुत द्यामहमृतूंरजनयं सप्त सिन्धून् ।
अहं सत्यमनृतं यद्वदामि यो अग्नीषोमावजुषे सखाया ॥३॥

मह्यम् । आपः । मधुऽमत् । आ । ईरयन्ताम् । मह्यम् । सूरः । अभरत् । ज्योतिषे । कम् ।
मह्यम् । देवाः । उत । विश्वे । तपःऽजाः । मह्यम् । देवः । सविता । व्यचः । धात् ॥१॥
अहम् । विवेच । पृथिवीम् । उत । द्याम् । अहम् । ऋतून् । अजनयम् । सप्त । साकम् ।
अहम् । सत्यम् । अनृतम् । यत् । वदामि । अहम् । दैवीम् । परि । वाचम् । विशः । च ॥
अहम् । जजान । पृथिवीम् । उत । द्याम् । अहम् । ऋतून् । अजनयम् । सप्त । सिन्धून् ।
अहम् । सत्यम् । अनृतम् । यत् । वदामि । यः । अग्नीषोमौ । अजुषे । सखाया ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Aryaman

VI.60.1 Here comes in front the match-maker (aryaman) having white hair, seeking a husband for this maiden and also a wife for wifeless man.

VI.60.2 O match-maker, this maiden has got tired going to wedding-gatherings of other girls. Now, O dear match-maker, let other girls come to the wedding ceremony of this maiden.

VI.60.3 The sustainer Lord (dhātā) upholds the earth, the sustainer Lord upholds the sky and also the sun. May the sustainer Lord grant to this maid, a husband such as she desires (according to her wish).

Rudraḥ

VI.61.1 May the waters, full of sweetness, flow for me; may the sun bring pleasant light to illumine (to enlighten) me; may all the enlightened ones, (born of) practising austerities, and also the divine impeller Lord, grant me what is desirable for me.

VI.61.2 I have set the earth and the sky apart. I have created seven seasons together. What is untrue, I speak truly. I have brought the divine speech to people all around.

VI.61.3 I have created the earth, as well as, the sky. I have created the seasons and the rivers seven. What is untrue, I speak truly. I take pleasure in the friendship of the Lord adorable (Agni) and blissful (Soma).

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६२) द्विषष्टितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । रुद्रो मन्त्रोक्ता वा देवताः । त्रिष्टुप् छन्दः ॥

वैश्वानरो रश्मिभिर्नः पुनातु वातः प्राणेनेषिरो नभोभिः ।
द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये नः पुनीताम् ॥१॥
वैश्वानरीं सूनृतामा रभध्वं यस्या आशास्तन्वो वीतपृष्ठाः ।
तया गृणन्तः सधमादेषु वयं स्याम पतयो रयीणाम् ॥२॥
वैश्वानरीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
इहेडया सधमादं मदन्तो ज्योक्पश्येम सूर्यमुच्चरन्तम् ॥३॥

वैश्वानरः । रश्मिऽभिः । नः । पुनातु । वातः । प्राणेन । इषिरः । नभःऽभिः । द्यावापृथिवी इति । पयसा । पयस्वती इति । ऋतवरी इत्यृतऽवरी । यज्ञिये इति । नः । पुनीताम् ॥ १ ॥

वैश्वानरीम् । सूनृताम् । आ । रभध्वम् । यस्याः । आशाः । तन्वः । वीतऽपृष्ठाः ।
तया । गृणन्तः । सधऽमादेषु । वयम् । स्याम । पतयः । रयीणाम् ॥ २ ॥

वैश्वानरीम् । वर्चसे । आ । रभध्वम् । शुद्धाः । भवन्तः । शुचयः । पावकाः ।
इह । इडया । सधऽमादम् । मदन्तः । ज्योक् । पश्येम । सूर्यम् । उत्ऽचरन्तम् ॥ ३ ॥

(६३) त्रिषष्टितमं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य ब्रह्मन ऋषिः । (१-३) प्रथमाद्विदृचस्य निर्ऋतिर्यमो वृत्युश्च, (४) चतुर्थ्या ऋचश्चाग्निर्देवताः । (१) प्रथमाया अतिजगती, (२-३) द्वितीयातृतीययोर्जगतीगर्भा जगती, (४) चतुर्थ्याश्चानुष्टुप् छन्दांसि ॥

यत्ते देवी निर्ऋतिराबबन्ध दामं ग्रीवास्वविमोक्यं यत् ।
तत्ते वि ष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः ॥१॥
नमोस्तु ते निर्ऋते तिग्मतेजोयस्मयान्वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित्त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ॥२॥

यत् । ते । देवी । निःऽऋतिः । आऽबबन्ध । दामं । ग्रीवासु । अविऽमोक्यम् । यत् ।
तत् । ते । वि । स्यामि । आयुषे । वर्चसे । बलाय । अदोमदम् । अन्नम् । अद्धि । प्रऽसूतः ॥ १ ॥

नमः । अस्तु । ते । निःऽऋते । तिग्मऽतेजः । अयस्मयान् । वि । चृत । बन्धऽपाशान् ।
यमः । मह्यम् । पुनः । इत् । त्वाम् । ददाति । तस्मै । यमाय । नमः । अस्तु । मृत्यवे ॥ २ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vaisvānara etc. (Cosmic man)

VI.62.1 May the fire, benefactor of all men, purify us with his rays; may the wind quickened with clouds (purify us) with breath. May the heaven and earth, rich in water, righteous and engaged in selfless actions, purify us.

VI.62.2 Start, O men, reciting the speech of praises of Vaiśvānara (the benefactor of all men); the body of that speech are these wide-backed regions. Reciting that speech at our happy gatherings, may we become the masters of riches.

VI.62.3 Start, O men, reciting the speech of praises of Vaiśvānara (the benefactor of all men) for splendour, becoming cleansed, pure and purifying. Here enjoying the happy gathering with good food, may we see the rising (uccarantam) sun for long.

Nir-rtih - Perdition

VI.63.1 What collar the divine perdition (distress, Nir-ṛti) has fastened round your neck and which can not be loosened, that I unfasten for your long life, lustre and strength (as if) born anew, eat the food that does no harm.

Yamaḥ

VI.63.2 Obeissance be to you, O perdition (distress) of sharpened fury. May you loosen the binding iron-fetters. The controller (death) verily gives them to you, O men, now give them back to me. Our homage be to that controller, the death.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयस्मये द्रुपदे बेधिष इहाभिहितो मृत्युभिर्ये सहस्त्वम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ॥३॥

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इडस्पदे समिध्यसे स नो वसून्या भर ॥४॥

अयस्मये । द्रुऽपदे । बेधिषे । इह । अभिऽहितः । मृत्युऽभिः । ये । सहस्त्वम् । यमेन ।
त्वम् । पितृऽभिः । सम्ऽविदानः । उत्ऽतमम् । नाकम् । अधि । रोहय । इमम् ॥ ३ ॥

सम्ऽसम् । इत् । युवसे । वृषन् । अग्ने । विश्वानि । अर्यः । आ ।
इडः । पदे । सम् । इध्यसे । सः । नः । वसूनि । आ । भर ॥ ४ ॥

(६४) चतुःषष्टितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । विश्वे देवा मनश्च देवताः । (१, ३) प्रथमातृतीययोर्ऋचोरनुष्टुप्, (२) द्वितीयायाश्च त्रिष्टुप् छन्दसी ॥

सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥१॥
समानो मन्त्रः समितिः समानी समानं व्रतं सह चित्तमेषाम् ।
समानेन वो हविषा जुहोमि समानं चेतो अभिसंविशध्वम् ॥२॥
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥३॥

सम् । जानीध्वम् । सम् । पृच्यध्वम् । सम् । वः । मनांसि । जानताम् ।
देवाः । भागम् । यथा । पूर्वे । सम्ऽजानानाः । उपऽआसते ॥ १ ॥
समानः । मन्त्रः । सम्ऽइतिः । समानी । समानम् । व्रतम् । सह । चित्तम् । एषाम् ।
समानेन । वः । हविषा । जुहोमि । समानम् । चेतः । अभिऽसंविशध्वम् ॥ २ ॥
समानी । वः । आऽकूतिः । समाना । हृदयानि । वः ।
समानम् । अस्तु । वः । मनः । यथा । वः । सुऽसह । असति ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Mṛtyuḥ - Death

VI.63.3 When you bind a man to the iron-peg, then in this world, he stays surrounded with deaths, which are thousands. (O distress divine), may you, in accord with the controller and the elders, raise this man to the highest sorrowless world.

Agniḥ

VI.63.4 O vigorous fire-divine, you are the masters. You unite all with each other. You are kindled at the place of sacrifice (recitation). May you bring riches to us. (Also Ṛg. X.191.1)

Sām - manasyam : Complete Understanding

VI.64.1 Know each other. Be united together. Understand the thoughts of each other among yourselves, just as the enlightened ones of olden times waited for their shares with complete understanding.(Cf. Ṛg. X.191.2)

VI.64.2 Let your consultations be common, your assemblies common, you duties common and thoughts of all of you be common and concurrent. I offer to you oblations (supplies) jointly. Strive for a common objective (purpose). (Cf. Ṛg. X.191.3)

VI.64.3 Let your determination be one and the same (common). Let your hearts be in harmony with each other. Let you minds be one and united, so that all goes well with you. (Cf. Ṛg. X.191.4)

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६५) पञ्चषष्टितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । चन्द्र इन्द्रः पराशरो वा देवता ।
(१) प्रथमर्चः पथ्यापङ्क्तिः, (२-३) द्वितीयातृतीययोश्चानुष्टुप् छन्दसी ॥

अव॑ मन्यु॒रवा॑यता॒व बा॒हू मनो॒युजा॑ ।
परा॑शर॒ त्वं तेषां॑ परा॒ञ्चं शुष्म॑मर्दया॒धा नो॒ र॒यिमा कृ॑धि ॥१॥
निर्ह॑स्तेभ्यो॒ नैर्ह॒स्तं यं दे॒वाः शरु॑मस्यथ । वृश्चामि॒ शत्रू॑णां बा॒हूननेने॑न हु॒विषा॒हम् ॥२॥
इन्द्र॑श्चकार प्रथ॒मं नैर्ह॒स्तमसु॑रेभ्यः । जय॑न्तु॒ सत्वा॑नो॒ मम॑ स्थि॒रेणेन्द्रे॑ण मे॒दिना॑ ॥३॥

अव॑ । म॒न्युः । अव॑ । आऽय॑ता । अव॑ । बा॒हू इति॑ । म॒नः॒ऽयुजा॑ । परा॑ऽशर ।
त्वम् । तेषा॑म् । परा॑ञ्चम् । शुष्म॑म् । अ॒र्द॒य॒ । अध॑ । नः॒ । र॒यिम् । आ । कृ॒धि॒ ॥ १ ॥
निः॒ऽह॒स्तेभ्यः॑ । नैः॒ऽह॒स्तम् । यम् । दे॒वाः॑ । शरु॑म् । अ॒स्य॒थ ।
वृ॒श्चामि॑ । श॒त्रू॑णाम् । बा॒हून् । अ॒नेन॑ । हु॒विषा॑ । अ॒हम् ॥ २ ॥
इन्द्रः॑ । च॒कार॑ । प्र॒थ॒मम् । नैः॒ऽह॒स्तम् । असु॑रेभ्यः ।
जय॑न्तु । सत्वा॑नः । मम॑ । स्थि॒रेण॑ । इन्द्रे॑ण । मे॒दिना॑ ॥ ३ ॥

(६६) षट्षष्टितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । चन्द्र इन्द्रो वा देवता । (१) प्रथमर्चस्त्रिष्टुप्, (२-३) द्वितीयातृतीययोश्चानुष्टुप् छन्दसी ॥

निर्ह॑स्तः शत्रु॒रभि॒दास॑न्नस्तु॒ ये सेना॑भि॒र्युध॑मा॒यन्त्य॒स्मान् ।
सम॑र्पयेन्द्र महता व॒धेन॒ द्रात्वे॑षामघहा॒रो दिवि॑द्धः ॥१॥
आ॒त॒न्वा॒ना आ॒यच्छ॑न्तोऽस्य॒न्तो ये च॒ धाव॑थ ।
निर्ह॑स्ताः शत्रवः स्थ॒नेन्द्रो॑ वो॒द्य परा॑शरीत् ॥२॥
निर्ह॑स्ताः सन्तु शत्र॒वोऽङ्गै॒षां म्ला॑पयामसि ।
अथै॑षामिन्द्र वेदां॑सि शत॒शो वि भ॑जामहै ॥३॥

निः॒ऽह॒स्तः॑ । श॒त्रुः॑ । अ॒भि॒ऽदास॑न् । अ॒स्तु॒ । ये । सेना॑भिः । युध॑म् । आ॒ऽय॒न्ति॒ । अ॒स्मान् ।
सम् । अ॒र्प॒य॒ । इ॒न्द्र॒ । म॒ह॒ता । व॒धेन॑ । द्रा॒तु॒ । ए॒षा॒म् । अ॒घ॒ऽहा॒रः । विऽदि॑द्धः ॥ १ ॥
आ॒ऽत॒न्वा॒नाः । आ॒ऽय॒च्छ॒न्तः । अ॒स्य॒न्तः । ये । च॒ । धाव॑थ ।
निः॒ऽह॒स्ताः॑ । श॒त्र॒वः॑ । स्थ॒न । इ॒न्द्रः॑ । वः॒ । अ॒द्य । परा॑ । अ॒शा॒री॒त् ॥ २ ॥
निः॒ऽह॒स्ताः॑ । स॒न्तु॒ । श॒त्र॒वः॑ । अङ्ग॑ । ए॒षा॒म् । म्ला॒प॒या॒म॒सि॒ ।
अथ॑ । ए॒षा॒म् । इ॒न्द्र॒ । वेदां॑सि । श॒त॒ऽशः॑ । वि । भ॒जा॒म॒है॒ ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Parāśarahi Indraḥ

VI.65.1 Let your fury relax, let your stretched (bows) relax; let your two arms, in unison with mind, relax. May you, O destroyer, shake their strength away. Then may you grant riches to us.

VI.65.2 O enlightened ones, the disarming weapon, which you hurl on armless enemies, with that, I hew the arms of foes, by this offering.

VI.65.3 First of all, the resplendent Lord disarms the evil-doers. May my warriors win with the help of ever-unwavering adorable Lord.

Indraḥ

VI.66.1 May the enemy assailing us be disarmed; also those, who with armies come to fight against us. O resplendent one, strike them with (your) mighty weapon. May their plunderer (chief) run short through (with arrows).

VI.66.2 O enemies, who rush on stringing (your bows), stretching and hurling, lay down your arms. The resplendent one has over-shot you today.

VI.66.3 May the enemies be disarmed. We make their limbs languid. Then, O resplendent one, let us divide their hundred-fold riches among ourselves.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६७) सप्तषष्टितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । चन्द्र इन्द्रो वा देवता । अनुष्टुप् छन्दः ॥

परि॒ वर्त्मा॑नि॒ सर्व॑त॒ इन्द्रः॑ पू॒षा च॑ सस्रतुः ।
मुह्य॑न्त्व॒द्यामूः सेना॒ अ॒मित्रा॑णां पर॒स्त॒राम् ॥१॥
मू॒ढा अ॒मित्रा॑श्चरताशी॒र्षाण॑ इ॒वाह॑यः । तेषां॑ वो अ॒ग्निर्मू॒ढाना॒मिन्द्रो॑ हन्तु॒ वर॑ंवरम् ॥२॥
ऐषु॑ नह्य वृषा॒जिनं॑ हरि॒णस्या॒ भिय॑ं कृधि । परा॑ङमित्र एषत्व॒र्वाची॒ गौरु॒पेष॑तु ॥३॥

परि॑ । वर्त्मा॑नि । सर्व॑तः । इन्द्रः॑ । पू॒षा । च॒ । सस्रतुः ।
मुह्य॑न्तु । अ॒द्य । अ॒मूः । सेनाः॑ । अ॒मित्रा॑णाम् । पर॒ः ऽत॒राम् ॥ १ ॥
मू॒ढाः । अ॒मित्राः॑ । चर॑त । अ॒शी॒र्षाणः॑ ऽइव । अह॑यः ।
तेषा॑म् । व॒ः । अ॒ग्निः ऽमू॒ढाना॑म् । इन्द्रः॑ । ह॒न्तु॒ । वर॑म् ऽवरम् ॥ २ ॥
आ । ए॒षु॒ । न॒ह्य॒ । वृषा॑ । अ॒जिन॑म् । ह॒रि॒णस्य॑ । भिय॑म् । कृ॒धि॒ ।
परा॑ङ् । अ॒मित्रः॑ । एष॑तु । अ॒र्वाची॑ । गौः । उप॑ । ए॒ष॒तु॒ ॥ ३ ॥

(६८) अष्टषष्टितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः । (१) प्रथमर्चश्चतुष्पदा पुरोविराडतिशाक्करगर्भा जगती, (२) द्वितीयाया अनुष्टुप्, (३) तृतीयायाश्चातिजगतीगर्भा त्रिष्टुप् छन्दांसि ॥

आय॑मगन्त्सवि॒ता क्षु॒रेणो॒ष्णेन॑ वाय उद॒केनेहि॑ ।
आ॒दि॒त्या रु॒द्रा वस॑व उन्दन्तु सचेत॒सः सोम॑स्य॒ राज्ञो॑ वपत प्रचेतसः ॥१॥
अदि॑तिः श्म॒श्रु व॑पत्वाप॑ उन्दन्तु॒ वर्च॑सा ।
चिकि॑त्सतु प्र॒जाप॑तिर्दी॒र्घायु॑त्वाय॒ चक्ष॑से ॥२॥
येनाव॑पत्सवि॒ता क्षु॒रेण॒ सोम॑स्य॒ राज्ञो॒ वरु॑णस्य॒ वि॒द्वान् ।
तेन॑ ब्रह्माणो॒ वप॒तेद॒मस्य॒ गोमा॒नश्वा॑व॒यम॑स्तु प्र॒जाव॑ान् ॥३॥

आ । अ॒यम् । अ॒ग॒न् । स॒वि॒ता । क्षु॒रेण॑ । उ॒ष्णेन॑ । वा॒यो॒ इति॑ । उ॒द॒केन॑ । आ । इ॒हि॒ ।
आ॒दि॒त्याः । रु॒द्राः । वस॑वः । उ॒न्द॒न्तु॒ । सऽचेतसः । सोम॑स्य । राज्ञः॑ । व॒प॒त॒ । प्रऽचेतसः ॥
अदि॑तिः । श्म॒श्रु । व॒प॒तु॒ । आपः॑ । उ॒न्द॒न्तु॒ । वर्च॑सा ।
चिकि॑त्सतु । प्र॒जाऽप॑तिः । दी॒र्घायु॑ऽत्वाय । चक्ष॑से ॥ २ ॥
येन॑ । अव॑पत् । स॒वि॒ता । क्षु॒रेण॑ । सोम॑स्य । राज्ञः॑ । वरु॑णस्य । वि॒द्वान् । तेन॑ । ब्रह्मा॑णः ।
व॒प॒त॒ । इ॒दम् । अ॒स्य॒ । गोऽमा॑न् । अश्व॑ऽवान् । अ॒यम् । अ॒स्तु॒ । प्र॒जाऽवा॑न् ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Indraḥ

VI.67.1 Let the resplendent one and the nourisher move along all the paths. Let those hosts of enemies be confounded and flee far away today.

VI.67.2 May you, O enemies, move about bewildered like snakes with severed heads. Of you, confounded by the adorable one (the army chief), let the resplendent one (the king) slay each and every prominent chief.

VI.67.3 With your might, put deer's hide on them (the enemies). Create terror among them all around. Let the enemy flee away; let his cows come here to us.

Savitṛ and others : As in the verses

VI.68.1 This sun (Savitā) has come with the razor. O wind, come with warm water. May the ādityas (suns of twelve months), the rudras (vital breaths), and the vasus (dwelling regions) moisten the hair with one mind. Shave the hair of the blissful king with utmost care.

VI.68.2 Let the indivisible earth shave the beard. Let the waters moisten him with lustre. May the Lord of creatures treat scratches with medicines, so that this king may have a long life with good vision.

VI.68.3 With which razor the knowledgeable sun shaved the blissful king and the venerable king, O learned priests, with the same razor shave the hair and beard of this man. May he be rich in cows, horses and progeny (children).

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६९) एकोनसप्ततितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । बृहस्पतिरग्निर्वा देवते । अनुष्टुप् छन्दः ॥

गिरावरगरांटेषु हिरण्ये गोषु यद्यशः । सुरायां सिच्यमानायां कीलाले मधु तन्मयि ॥१॥
अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती । यथा भर्गस्वतीं वाचमावदानि जनाँ अनु ॥२॥
मयि वर्चो अथो यशोथो यज्ञस्य यत्पयः । तन्मयि प्रजापतिर्दिवि द्यामिव दृंहतु ॥३॥

गिरौ । अरगरांटेषु । हिरण्ये । गोषु । यत् । यशः । सुरायाम् ।
सिच्यमानायाम् । कीलाले । मधु । तत् । मयि ॥ १ ॥

अश्विना । सारघेण । मा । मधुना । अङ्क्तम् । शुभः । पती इति ।
यथा । भर्गस्वतीम् । वाचम् । आऽवदानि । जनान् । अनु ॥ २ ॥

मयि । वर्चः । अथो इति । यशः । अथो इति । यज्ञस्य । यत् । पयः ।
तत् । मयि । प्रजाऽपतिः । दिवि । द्याम्ऽइव । दृंहतु ॥ ३ ॥

(७०) सप्ततितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य काङ्कायन ऋषिः । अघ्न्या देवता । जगती छन्दः ॥

यथा मांसं यथा सुरा यथाक्षा अधिदेवने ।
यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्ये मनोधि वत्से नि हन्यताम् ॥१॥
यथा हस्ती हस्तिन्याः पदेन पदमुद्युजे ।
यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्ये मनोधि वत्से नि हन्यताम् ॥२॥
यथा प्रधिर्यथोपधिर्यथा नभ्यं प्रधावधि ।
यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्ये मनोधि वत्से नि हन्यताम् ॥३॥

यथा । मांसम् । यथा । सुरा । यथा । अक्षाः । अधिऽदेवने । यथा । पुंसः । वृषण्यतः ।
स्त्रियाम् । निऽहन्यते । मनः । एव । ते । अघ्ये । मनः । अधि । वत्से । नि । हन्यताम् ॥

यथा । हस्ती । हस्तिन्याः । पदेन । पदम् । उत्ऽयुजे । यथा । पुंसः । वृषण्यतः ।
स्त्रियाम् । निऽहन्यते । मनः । एव । ते । अघ्ये । मनः । अधि । वत्से । नि । हन्यताम् ॥ २ ॥

यथा । प्रऽधिः । यथा । उपऽधिः । यथा । नभ्यम् । प्रऽधौ । अधि । यथा । पुंसः ।
वृषण्यतः । स्त्रियाम् । निऽहन्यते । मनः । एव । ते । अघ्ये । मनः । अधि । वत्से ।
नि । हन्यताम् ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bṛhaspatiḥ : Pair of Aśvins

VI.69.1 What glory is there in the hill, in valleys, in gold, and in cows, what sweetness is there in the strong drink being poured out, and in the sweet drink, may that come unto me.

VI.69.2 O twin healers, lords of weal, may you anoint me with delicious bee-honey, so that I may utter glorious words to men.

VI.69.3 What lustre, glory and the essence of sacrifice is there, may the Lord of creatures establish that in me firmly, as light is in the sky.

Aghnyā : Inviolable Cow

VI.70.1 As meat is attached with wine; as dice are attached with a gambling place; as the mind of a passionate man is attached to a woman; so O inviolable one (cow), let your mind be attached to your calf (vatsa).

VI.70.2 As a male elephant passes his foot against the foot of a cow-elephant; as the mind of a passionate man is attached to a woman; so, O inviolable one, let your mind be attached to your calf.

VI.70.3 As the felly is attached to the rim, as the rain is attached to the spokes; as the spokes are attached to the nave, as the mind of a passionate man is attached to a woman; so, O inviolable one, let you mind be attached to your calf.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७१) एकसप्ततितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । (१–२) प्रथमाद्वितीययोर्ऋचोरग्निः, (३) तृतीयायाश्च विश्वे देवा देवताः । (१–२) प्रथमाद्वितीययोर्जगती, (३) तृतीयायाश्च त्रिष्टुप् छन्दसी ॥

यदन्नमद्मि बहुधा विरूपं हिरण्यमश्वमुत गामजामविम् ।
यदेव किं च प्रतिजग्रहाहमग्निष्टद्धोता सुहुतं कृणोतु ॥१॥
यन्मा हुतमहुतमाजगाम दत्तं पितृभिरनुमतं मनुष्यैः ।
यस्मान्मे मन उदिव रारजीत्यग्निष्टद्धोता सुहुतं कृणोतु ॥२॥
यदन्नमद्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि ।
वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदुस्त्वन्नम् ॥३॥

यत् । अन्नम् । अद्मि । बहुऽधा । विऽरूपम् । हिरण्यम् । अश्वम् । उत । गाम् । अजाम् । अविम् । यत् । एव । किम् । च । प्रतिऽजग्रह । अहम् । अग्निः । तत् । होता । सुऽहुतम् । कृणोतु ॥ १ ॥
यत् । मा । हुतम् । अहुतम् । आऽजगाम । दत्तम् । पितृऽभिः । अनुऽमतम् । मनुष्यैः । यस्मात् । मे । मनः । उत्ऽइव । रारजीति । अग्निः । तत् । होता । सुऽहुतम् । कृणोतु ॥
यत् । अन्नम् । अद्मि । अनृतेन । देवाः । दास्यन् । अदास्यन् । उत । सम्ऽगृणामि ।
वैश्वानरस्य । महतः । महिम्ना । शिवम् । मह्यम् । मधुऽमत् । अस्तु । अन्नम् ॥ २ ॥

(७२) द्विसप्ततितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वाङ्गिरा ऋषिः । शेपोऽर्को देवता । (१) प्रथमर्चो जगती, (२) द्वितीयाया अनुष्टुप्, (३) तृतीयायाश्च भुरिगनुष्टुप् छन्दांसि ॥

यथासितः प्रथयते वशाँ अनु वपूँषि कृण्वन्नसुरस्य मायया ।
एवा ते शेपः सहसायमर्कोऽङ्गेनाङ्गं संसमकं कृणोतु ॥१॥
यथा पसस्तायादरं वातेन स्थूलभं कृतम् ।
यावत्परस्वतः पसस्तावत्ते वर्धतां पसः ॥२॥
यावदङ्गीनं पारस्वतं हास्तिनं गार्दभं च यत् ।
यावदश्वस्य वाजिनस्तावत्ते वर्धतां पसः ॥३॥

यथा । असितः । प्रथयते । वशान् । अनु । वपूंषि । कृण्वन् । असुरस्य । मायया ।
एव । ते । शेपः । सहसा । अयम् । अर्कः । अङ्गेन । अङ्गम् । सम्ऽसमकम् । कृणोतु ॥
यथा । पसः । तायादरम् । वातेन । स्थूलभम् । कृतम् ।
यावत् । परस्वतः । पसः । तावत् । ते । वर्धताम् । पसः ॥ २ ॥
यावत्ऽअङ्गीनम् । पारस्वतम् । हास्तिनम् । गार्दभम् । च । यत् ।
यावत् । अश्वस्य । वाजिनः । तावत् । ते । वर्धताम् । पसः ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Agniḥ

VI.71.1 The food of various types, which I often eat, and the gold, horse, or cow, goat and sheep, whatever I have taken, may the adorable Lord, the offerer, make all that properly obtained.

VI.71.2 Whatever given or not given, gifted by the elders and approved by men, has come into my possession, and with which my heart is highly excited, may the Lord, the offerer, make all that properly obtained.

Viśvedevāḥ

VI.71.3 O enlightened ones, what food I eat falsely, and whatever I accumulate, whether giving or not giving in charities, with the greatness of the mighty Vaisvānara (benefactor of all), may that sweet food be propitious to me.

Śepaḥ - Arkaḥ (herb)

VI.72.1 As a black snake (cobra) expands himself at will, making various forms by the tricks of the snake-charmer (asura), even so may this arka herb make your male organ corresponding to the female organ by its strength.

VI.72.2 Just as the male organ of tāyādara (an animal) becomes enlarged due to wind, so may your male organ become as large as that of the wild ass (parasvān).

VI.72.3 As large is the male organ of the wild ass, of the elephant, of the ass and as large as that of a hot horse, so large may your male organ become, fitting well the female organ.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७३) त्रिसप्ततितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः । (१, ३) प्रथमातृतीययोर्ऋचोर्भुरिक्त्रिष्टुप्, (२) द्वितीयायाश्च त्रिष्टुप् छन्दसी ॥

एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु ।
अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः ॥१॥
यो वः शुष्मो हृदयेष्वन्तराकूतिर्या वो मनसि प्रविष्टा ।
तान्त्सीव्यामि हविषा घृतेन मयि सजाता रमतिर्वो अस्तु ॥२॥
इहैव स्त मापं याताध्यस्मत्पूषा परस्तादपथं वः कृणोतु ।
वास्तोष्पतिरनु वो जोहवीतु मयि सजाता रमतिर्वो अस्तु ॥३॥

आ । इह । यातु । वरुणः । सोमः । अग्निः । बृहस्पतिः । वसुऽभिः । आ । इह । यातु ।
अस्य । श्रियम् । उपऽसंयात । सर्वे । उग्रस्य । चेत्तुः । सम्ऽमनसः । सऽजाताः ॥ १ ॥
यः । वः । शुष्मः । हृदयेषु । अन्तः । आऽकूतिः । या । वः । मनसि । प्रऽविष्टा ।
तान् । सीव्यामि । हविषा । घृतेन । मयि । सऽजाताः । रमतिः । वः । अस्तु ॥ २ ॥
इह । एव । स्त । मा । अप । यात । अधि । अस्मत् । पूषा । परस्तात् । अपथम् । वः । कृणोतु ।
वास्तोः । पतिः । अनु । वः । जोहवीतु । मयि । सऽजाताः । रमतिः । वः । अस्तु ॥ ३ ॥

(७४) चतुःसप्ततितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । (१–२) प्रथमाद्वितीययोर्ऋचोर्मन्त्रोक्ताः, (३) तृतीयायाश्च त्रिणामा देवताः । (१–२) प्रथमाद्वितीययोरनुष्टुप्, (३) तृतीयायाश्च त्रिष्टुप् छन्दसी ॥

सं वः पृच्यन्तां तन्वः सं मनांसि समु व्रता ।
सं वोयं ब्रह्मणस्पतिर्भगः सं वो अजीगमत् ॥१॥
संज्ञपनं वो मनसोथो संज्ञपनं हृदः ।
अथो भगस्य यच्छ्रान्तं तेन संज्ञपयामि वः ॥२॥
यथादित्या वसुभिः संबभूवुर्मरुद्भिरुग्रा अर्हणीयमानाः ।
एवा त्रिणामन्नर्हणीयमान इमाञ्जनान्त्संमनसस्कृधीह ॥३॥

सम् । वः । पृच्यन्ताम् । तन्वः । सम् । मनांसि । सम् । ऊं इति । व्रता ।
सम् । वः । अयम् । ब्रह्मणः । पतिः । भगः । सम् । वः । अजीगमत् ॥१॥
सम्ऽज्ञपनम् । वः । मनसः । अथो इति । सम्ऽज्ञपनम् । हृदः ।
अथो इति । भगस्य । यत् । श्रान्तम् । तेन । सम्ऽज्ञपयामि । वः ॥ २ ॥
यथा । आदित्याः । वसुऽभिः । सम्ऽबभूवुः । मरुत्ऽभिः । उग्राः । अर्हणीयमानाः ।
एव । त्रिऽनामन् । अर्हणीयमानः । इमान् । जनान् । सम्ऽमनसः । कृधि । इह ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Varuṇa and others

VI.73.1 May the venerable Lord come here; here the blissful Lord and the adorable Lord. May the Lord supreme come here with riches (vasus) O kinsmen, come all of you together, one-minded to the glory of this formidable and wise (leader).

VI.73.2 The vehemence, which your hearts have harboured, and the determination, which has entered your minds, I annul with purified butter and provisions (offerings); O kinsmen, in me let your affection rest.

VI.73.3 Do stay here. Do not go away from us. May the nourisher Lord make your way, which leads away from us, unfit for travel. May the master of house-hold recall you again and again. O kinsmen, in me let your affection rest.

Brahmaṇaspatih etc.

VI.74.1 Let your bodies meet (unite) together, your minds and your actions (vows) be together. May this Lord of knowledge and the Lord of good fortune make you united.

VI.74.2 Let there be a common understanding of your minds and common understanding of your hearts. And then, what is weariness of your good fortune, with that I make you understand each other.

VI.74.3 Just as formidable and irrepressible ādityas (suns of twelve months) became united with the vasus (bestowers of wealth), so O irrēprssible three-named Lord (fire), may you make these people here of one mind.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७५) पञ्चसप्ततितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य कबन्ध ऋषिः । इन्द्रो देवता । (१-२) प्रथमाद्वितीययो-
र्ऋचोरनुष्टुप्, (३) तृतीयायाश्च षट्पदा जगती छन्दसी ॥

निर॒मुं नु॑द॒ ओक॑सः स॒पत्नो॒ यः पृ॑त॒न्यति॑ । नै॒र्बा॒ध्ये॑न ह॒विषेन्द्र॑ एनं॒ परा॑शरीत् ॥१॥
प॒र॒मां तं प॑रा॒वत॒मिन्द्रो॑ नुदतु वृत्र॒हा । यतो॒ न पुन॒राय॑ति शश्व॒तीभ्यः॒ समा॑भ्यः ॥२॥
एतु॑ ति॒स्रः प॑रा॒वत॒ एतु॒ पञ्च॒ जनाँ॒ अति॑ ।
एतु॑ ति॒स्रोति॑ रोच॒ना यतो॒ न पुन॒राय॑ति शश्व॒तीभ्यः॒ समा॑भ्यो॒ याव॒त्सूर्यो॒ अस॑द्दि॒वि ॥३॥

निः । अ॒मुम् । नु॒दे॒ । ओक॑सः । स॒ऽपत्नः॑ । यः । पृ॒त॒न्यति॑ ।
नैः॒ऽबा॒ध्ये॑न । ह॒विषा॑ । इन्द्रः॑ । ए॒न॒म् । परा॑ । अ॒श॒री॒त् ॥ १ ॥

प॒र॒माम् । तम् । प॒रा॒ऽवत॑म् । इन्द्रः॑ । नु॒द॒तु॒ । वृ॒त्र॒ऽहा ।
यतः॑ । न । पुनः॑ । आ॒ऽअय॑ति । श॒श्व॒तीभ्यः॑ । समा॑भ्यः ॥ २ ॥

एतु॑ । ति॒स्रः । प॒रा॒ऽवतः॑ । एतु॑ । पञ्च॑ । जना॑न् । अति॑ । एतु॑ । ति॒स्रः । अति॑ । रो॒च॒ना ।
यतः॑ । न । पुनः॑ । आ॒ऽअय॑ति । श॒श्व॒तीभ्यः॑ । समा॑भ्यः । याव॑त् । सूर्यः॑ । अस॑त् । दि॒वि ॥ ३ ॥

(७६) षट्सप्ततितमं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य कबन्ध ऋषिः । सान्तपनाग्निर्देवता । (१-२, ४) प्रथमाद्वितीययो-
र्ऋचोश्चतुर्थ्याश्चानुष्टुप्, (३) तृतीयायाश्च ककुम्मत्यनुष्टुप् छन्दसी ॥

य ए॑नं परि॒षीद॑न्ति समा॒दध॑ति॒ चक्ष॑से । सं॒प्रेद्धो॑ अ॒ग्निर्जि॒ह्वाभि॒रुदे॑तु॒ हृद॑या॒दधि॑ ॥१॥
अ॒ग्नेः सां॑तप॒नस्या॒हमायु॑षे प॒दमा र॑भे । अ॒द्धा॒तिर्यस्य॒ पश्य॑ति धू॒ममु॒द्यन्त॑मास्य॒तः ॥२॥

ये । ए॒न॒म् । प॒रि॒ऽसीद॑न्ति । स॒म्ऽआ॒दध॑ति । चक्ष॑से ।
स॒म्ऽप्रेद्धः॑ । अ॒ग्निः । जि॒ह्वाभिः॑ । उत् । ए॒तु॒ । हृद॑यात् । अधि॑ ॥ १ ॥

अ॒ग्नेः । सा॒म्ऽत॒प॒नस्य॑ । अ॒हम् । आयु॑षे । प॒दम् । आ । र॒भे॒ ।
अ॒द्धा॒तिः । यस्य॑ । पश्य॑ति । धू॒मम् । उ॒त्ऽयन्त॑म् । आ॒स्य॒तः ॥ २ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Indraḥ

VI.75.1 I throw that man out of house, the enemy, who assails us with a horde. May the resplendent army-chief put him to rout by stopping his supplies (haviṣā).

VI.75.2 May the resplendent army-chief, slayer of the evil, drive him away to the remotest distance, from where he may not return ever in years to come.

VI.75.3 Let him go beyond three remotest places; let him go beyond five races of minkind. Let him go beyond three shining lights, wherefrom he shall never come back, ever in years to come, as long as the sun is in the sky.

Sāntapana - Agnīḥ

VI.76.1 Those who sit around him and who pile up fuel to see him - may the fire-divine blazing with flames, rise up from their heart.

VI.76.2 For a long life, I move up to the abode of the burning (heating) fire-divine, from whose mouth the wise sage sees the smoke rising up.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो अस्य समिधं वेद क्षत्रियेण समाहिताम् । नाभिह्वारे पदं नि दधाति स मृत्यवे ॥३॥
नैनं घ्नन्ति पर्यायिणो न सन्नाँ अव गच्छति । अग्नेर्यः क्षत्रियो विद्वान्नाम गृह्णात्यायुषे ॥४॥

यः । अस्य । सम्ऽइधम् । वेद । क्षत्रियेण । सम्ऽआहिताम् ।
न । अभिऽह्वारे । पदम् । नि । दधाति । सः । मृत्यवे ॥ ३ ॥
न । एनम् । घ्नन्ति । परिऽआयिनः । न । सन्नान् । अव । गच्छति ।
अग्नेः । यः । क्षत्रियः । विद्वान् । नाम । गृह्णाति । आयुषे ॥४॥

(७७) सप्तसप्ततितमं सूक्तम्
(१-३) तृचस्यास्य सूक्तस्य कबन्ध ऋषिः । जातवेदा देवता । अनुष्टुप् छन्दः ॥

अस्माद्द्यौरस्मात्पृथिव्यस्माद्विश्वमिदं जगत् ।
आस्थाने पर्वता अस्थुः स्थाम्न्यश्वाँ अतिष्ठिपम् ॥१॥
य उदानट् परायणं य उदानप्न्यायनम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥२॥
जातवेदो नि वर्तय शतं ते सन्त्वावृतः ।
सहस्रं त उपावृतस्ताभिर्नः पुनरा कृधि ॥३॥

अस्मात् । द्यौः । अस्मात् । पृथिवी । अस्मात् । विश्वम् । इदम् । जगत् ।
आऽस्थाने । पर्वताः । अस्थुः । स्थाम्नि । अश्वान् । अतिष्ठिपम् ॥ १ ॥
यः । उत्ऽआनट् । पराऽअयनम् । यः । उत्ऽआनट् । निऽअयनम् ।
आऽवर्तनम् । निऽवर्तनम् । यः । गोपाः । अपि । तम् । हुवे ॥ २ ॥
जातऽवेदः । नि । वर्तय । शतम् । ते । सन्तु । आऽवृतः ।
सहस्रम् । ते । उपऽआवृतः । ताभिः । नः । पुनः । आ । कृधि ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

VI.76.3 Whoever knows the fuel of this (fire-divine) piled up by a heroic prince - he never seats his foot on a dangerous spot that may lead to death.

VI.76.4 Those, who surround him, are unable to kill him; he does not go down before the lurking foes - he the heroic prince, who invokes the name of the fire-divine (adorable Lord) for the length of life.

Jātavedāḥ

VI.77.1 The sky stands firm (asthād); the earth stands firm; all this living world stands firm. The mountains stand firm in their proper place. I have made the swift-moving senses stand still in their stall.

VI.77.2 Who controls the ascending up, who controls the descent (descending) downwards, who controls coming and going back - Him, the protector of earth, I invoke.

VI.77.3 O knower of all, may you turn back. May there be a hundred of your coming and a thousand of your going back. With them, may you restore us to prosperity again.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७८) अष्टसप्ततितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः (१-२) प्रथमाद्वितीययोर्ऋचोश्चन्द्रमाः, (३) तृतीयायाश्च त्वष्टा देवते । अनुष्टुप् छन्दः ॥

तेन॑ भू॒तेन॑ ह॒विषा॒यमा प्या॑यतां॒ पुन॑ः ।
जा॒यां या॑मस्मा आवा॑क्षु॒स्तां रसे॑ना॒भि व॑र्धताम् ॥१॥
अ॒भि व॑र्धतां॒ पय॑सा॒भि रा॒ष्ट्रेण॑ वर्धताम् ।
र॒य्या स॒हस्र॑वर्चसे॒मौ स्ता॑मनु॒पक्षि॑तौ ॥२॥
त्वष्टा॑ जा॒यामज॑नय॒त्त्वष्टा॑स्यै॒ त्वां पति॑म् ।
त्वष्टा॑ स॒हस्र॑मायूँषि दी॒र्घमायुः॑ कृणोतु वाम् ॥३॥

तेन॑ । भू॒तेन॑ । ह॒विषा॑ । अ॒यम् । आ । प्या॒य॒ता॒म् । पुन॑ः । जा॒याम् ।
या॒म् । अ॒स्मै॒ । आऽअवा॑क्षुः । ता॒म् । रसे॑न । अ॒भि । व॒र्ध॒ता॒म् ॥ १ ॥
अ॒भि । व॒र्ध॒ता॒म् । पय॑सा । अ॒भि । रा॒ष्ट्रेण॑ । व॒र्ध॒ता॒म् ।
र॒य्या । स॒हस्र॑ऽवर्चसा । इ॒मौ । स्ता॒म् । अ॒नु॒पऽक्षि॑तौ ॥ २ ॥
त्वष्टा॑ । जा॒याम् । अ॒ज॒न॒य॒त् । त्वष्टा॑ । अ॒स्यै॒ । त्वाम् । पति॑म् ।
त्वष्टा॑ । स॒हस्र॑म् । आयूँषि । दी॒र्घम् । आयुः॑ । कृ॒णो॒तु॒ । वा॒म् ॥ ३ ॥

(७९) एकोनाशीतितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । संस्फानो देवता । (१-२) प्रथमाद्वितीययोर्ऋचोर्गायत्री, (३) तृतीयायाश्च त्रिपदा प्राजापत्या जगती छन्दसी ॥

अ॒यं नो॒ नभ॑स॒स्पति॑ः सं॒स्फानो॑ अ॒भि र॑क्षतु । अस॑मातिं गृ॒हेषु॑ नः ॥१॥
त्वं नो॑ नभसस्पत॒ ऊर्जं॑ गृ॒हेषु॑ धारय । आ पु॒ष्टमे॒त्वा वसु॑ ॥२॥
देव॑ संस्फान सहस्रापो॒षस्ये॑शिषे ।
तस्य॑ नो रास्व॒ तस्य॑ नो धेहि॒ तस्य॑ ते भक्ति॒वांस॑ः स्याम ॥३॥

अ॒यम् । नः॒ । नभ॑सः । पति॑ः । स॒म्ऽस्फान॑ः । अ॒भि । र॒क्ष॒तु॒ । अस॑मातिम् । गृ॒हेषु॑ । नः॒ ।
त्वम् । नः॒ । नभ॑सः । पते॒ । ऊर्जं॑म् । गृ॒हेषु॑ । धा॒र॒य॒ ।
आ । पु॒ष्टम् । ए॒तु॒ । आ । वसु॑ ॥ २ ॥
देव॑ । स॒म्ऽस्फा॒न॒ । स॒हस्र॑ऽपोषस्य॑ । ई॒शि॒षे॒ । तस्य॑ । नः॒ । रा॒स्व॒ ।
तस्य॑ । नः॒ । धे॒हि॒ । तस्य॑ । ते॒ । भ॒क्ति॒ऽवांस॑ः । स्या॒म॒ ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Candramāḥ

VI.78.1 With that sumptuous sacrificial offering, may this man thrive again. May he enrich with happiness the bride, whom they have brought for him.

VI.78.2 May he prosper with milk; may he prosper with princely power. May both these be exhaustless in riches with thousands of splendours.

Tvaṣṭṛ

VI.78.3 The universal architect has made the wife; the universal architect has created you to be her husband. May the universal architect bless you both with a long life, with a thousand lives.

Saṁsphānam

VI.79.1 May this lord of clouds, grower of food-grains, protect well the unmeasurable wealth in our homes.

VI.79.2 O lord of clouds, may you maintain vigour (food-grains) in our homes. May the nourishment come to us and also the wealth.

VI.79.3 O Lord, grower of food-grains, you are master of a thousand nourishments. May you grant those to us. May you keep those with us. May we become sharers of that wealth of yours.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८०) अशीतितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । चन्द्रमा देवता । (१) प्रथमर्चो भुरिगनुष्टुप्, (२) द्वितीयाया अनुष्टुप्, (३) तृतीयायाश्च प्रस्तारपङ्क्तिश्छन्दांसि ॥

अन्तरिक्षेण पतति विश्वा भूतावचाकशत् ।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम ॥१॥
ये त्रयः कालकाञ्जा दिवि देवा इव श्रिताः ।
तान्त्सर्वाँल्ल ऊतयेस्मा अरिष्टतातये ॥२॥
अप्सु ते जन्म दिवि ते सधस्थं समुद्रे अन्तर्महिमा ते पृथिव्याम् ।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम ॥३॥

अन्तरिक्षेण । पतति । विश्वा । भूता । अवऽचाकशत् ।
शुनः । दिव्यस्य । यत् । महः । तेन । ते । हविषा । विधेम ॥ १ ॥

ये । त्रयः । कालकाञ्जाः । दिवि । देवाःऽइव । श्रिताः ।
तान् । सर्वान् । अह्वे । ऊतये । अस्मै । अरिष्टऽतातये ॥ २ ॥
अपूऽसु । ते । जन्म । दिवि । ते । सधऽस्थम् । समुद्रे । अन्तः । महिमा । ते । पृथिव्याम् ।
शुनः । दिव्यस्य । यत् । महः । तेन । ते । हविषा । विधेम ॥ ३ ॥

(८१) एकाशीतितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्त आदित्यो वा देवता । अनुष्टुप् छन्दः ॥

यन्तासि यच्छसे हस्तावप रक्षाँसि सेधसि ।
प्रजां धनं च गृह्णानः परिहस्तो अभूदयम् ॥१॥
परिहस्त वि धारय योनिं गर्भाय धातवे ।
मर्यादे पुत्रमा धेहि तं त्वमा गमयागमे ॥२॥
यं परिहस्तमबिभरदितिः पुत्रकाम्या ।
त्वष्टा तमस्या आ बध्नाद्यथा पुत्रं जनादिति ॥३॥

यन्ता । असि । यच्छसे । हस्तौ । अप । रक्षाँसि । सेधसि ।
प्रऽजाम् । धनम् । च । गृह्णानः । परिऽहस्तः । अभूत् । अयम् ॥ १ ॥
परिऽहस्त । वि । धारय । योनिम् । गर्भाय । धातवे । मर्यादे ।
पुत्रम् । आ । धेहि । तम् । त्वम् । आ । गमय । आऽगमे ॥ २ ॥
यम् । परिऽहस्तम् । अबिभः । अदितिः । पुत्रऽकाम्या । त्वष्टा ।
तम् । अस्यै । आ । बध्नात् । यथा । पुत्रम् । जनात् । इति ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Candramāḥ : Moon

VI.80.1 He flies through the midspace watching over all the beings. What greatness (mahas) of (the) heavenly hound is there, with that oblation we adore you.

VI.80.2 The three kālakāñjas (time-indicators), that stay in the sky like the bounties of Nature, all of them we invoke for protection and secure this man from harm.

VI.80.3 In waters is your birth, in the sky is your abode; in the ocean and on the earth is your majesty. What greatness or mahimā (mahas) of (the) your heavenly hound is there, with that oblation we adore you.

Ādityaḥ : the son of Aditi

VI.81.1 You are the controller. You keep both the hands under control. You drive injurious germs away. This bangle (parihasta) has been the receiver (bringer; harbinger) of progeny and wealth. (Parihasta= an ornament for wrist)

VI.81.2 O bangle, keep the womb in proper condition for holding the embryo. O wife, may you conceive a desired son and bring him forth in due course.

VI.81.3 The bangle, which was worn by aditi (the earth) with the desire of having a son - the universal architect has put the same on this woman, so that she may bear a son.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८२) द्व्यशीतितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य भग ऋषिः । इन्द्रो देवता । अनुष्टुप् छन्दः ॥

आगच्छत आगतस्य नाम गृह्णाम्यायतः ।
इन्द्रस्य वृत्रघ्नो वन्वे वासवस्य शतक्रतोः ॥१॥
येन सूर्यां सावित्रीमश्विनोहतुः पथा ।
तेन मामब्रवीद्भगो जायामा वहतादिति ॥२॥
यस्तेऽङ्कुशो वसुदानो बृहन्निन्द्र हिरण्ययः ।
तेना जनीयते जायां मह्यं धेहि शचीपते ॥३॥

आऽगच्छतः । आऽगतस्य । नाम । गृह्णामि । आऽयतः ।
इन्द्रस्य । वृत्रऽघ्नः । वन्वे । वासवस्य । शतऽक्रतोः ॥ १ ॥
येन । सूर्याम् । सावित्रीम् । अश्विना । ऊहतुः । पथा ।
तेन । माम् । अब्रवीत् । भगः । जायाम् । आ । वहतात् । इति ॥ २ ॥
यः । ते । अङ्कुशः । वसुऽदानः । बृहन् । इन्द्र । हिरण्ययः ।
तेन । जनिऽयते । जायाम् । मह्यम् । धेहि । शचीऽपते ॥ ३ ॥

(८३) त्र्यशीतितमं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्याङ्गिरा ऋषिः । मन्त्रोक्ता देवताः । (१-३) प्रथमादितृचस्यानुष्टुप्, (४) चतुर्थ्या ऋचश्चैकावसाना द्विपदा निचृदार्च्यनुष्टुप् छन्दसी ॥

अपचितः प्र पतत सुपर्णो वसतेरिव ।
सूर्यः कृणोतु भेषजं चन्द्रमा वोपोच्छतु ॥१॥
एन्येका श्येन्येका कृष्णैका रोहिणी द्वे ।
सर्वासामग्रभं नामावीरघ्नीरपेतन ॥२॥

अपऽचितः । प्र । पतत । सुऽपर्णः । वसतेःऽइव । सूर्यः । कृणोतु ।
भेषजम् । चन्द्रमाः । वः । अप । उच्छतु ॥ १ ॥
एनी । एका । श्येनी । एका । कृष्णा । एका । रोहिणी । इति । द्वे इति । सर्वासाम् ।
अग्रभम् । नाम । अवीरऽघ्नीः । अप । इतन ॥ २ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Indraḥ

VI.82.1 I call out the name of the resplendent one, the slayer of nescience, the lord of wealth, and performer of a hundred selfless deeds (śatakratu) - who is arriving, has come and is approaching near. I like him.

VI.82.2 The Lord of good fortune has spoken to me; bring a wife by the same path, by which the twins divine have brought the maiden of marriageable age, the daughter of the impeller (house-holder).

VI.82.3 O resplendent Lord, with your great golden hook, which is bestower of wealth, may you bestow a wife on me, who seek a wife, O master of good action (śacīpati).

Sūrya etc. (the Sun)

VI.83.1 O malignant tumour (eruptious) (apacit), may you fly away like an eagle from its nest. May the sun provide a remedy and the moon dislodge you.

VI.83.2 One is spotted; one is white; one is black; and two are reddish. I have pronounced the names of all of you. May you go away, without injuring our heroes.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असूतिका रामायण्युपचित्र पतिष्यति ।
ग्लौरितः प्र पतिष्यति स गलुन्तो नशिष्यति ॥३॥
वीहि स्वामाहुतिं जुषाणो मनसा स्वाहा मनसा यदिदं जुहोमि ॥४॥

असूतिका । रामायणी । अपऽचित् । प्र । पतिष्यति ।
ग्लौः । इतः । प्र । पतिष्यति । सः । गलुन्तः । नशिष्यति ॥ ३ ॥
वीहि । स्वाम् । आऽहुतिम् । जुषाणः । मनसा । स्वाहा । मनसा । यत् । इदम् । जुहोमि ॥४॥

(८४) चतुरशीतितमं सूक्तम्

(१–४) चतुर्ऋचस्यास्य सूक्तस्याङ्गिरा ऋषिः । निर्ऋतिर्देवता । (१) प्रथमर्चो भुरिग्जगती, (२) द्वितीयाया-स्त्रिपदार्षी बृहती, (३) तृतीयाया जगती, (४) चतुर्थ्याश्च भुरिक्त्रिष्टुप् छन्दांसि ॥

यस्यास्त आसनि घोरे जुहोम्येषां बद्धानामवसर्जनाय कम् ।
भूमिरिति त्वाभिप्रमन्वते जना निर्ऋतिरिति त्वाहं परि वेद सर्वतः ॥१॥
भूते हविष्मती भवैष ते भागो यो अस्मासु ।
मुञ्चेमानमूनेनसः स्वाहा ॥२॥
एवो ष्वस्मन्निर्ऋतेनेहा त्वमयस्मयान्वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित्त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ॥३॥
अयस्मये द्रुपदे बेधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ॥४॥

यस्याः । ते । आसनि । घोरे । जुहोमि । एषाम् । बद्धानाम् । अवऽसर्जनाय । कम् । भूमिः ।
इति । त्वा । अभिऽप्रमन्वते । जनाः । निःऽऋतिः । इति । त्वा । अहम् । परि । वेद । सर्वतः ॥ १ ॥
भूते । हविष्मती । भव । एषः । ते । भागः । यः । अस्मासु ।
मुञ्च । इमान् । अमून् । एनसः । स्वाहा ॥ २ ॥
एवो इति । सु । अस्मत् । निःऽऋते । अनेहा । त्वम् । अयस्मयान् । वि । चृत । बन्धऽपाशान् ।
यमः । मह्यम् । पुनः । इत् । त्वाम् । ददाति । तस्मै । यमाय । नमः । अस्तु । मृत्यवे ॥ ३ ॥
अयस्मये । द्रुऽपदे । बेधिषे । इह । अभिऽहितः । मृत्युभिः । ये । सहस्रम् ।
यमेन । त्वम् । पितृऽभिः । सम्ऽविदानः । उत्ऽतमम् । नाकम् । अधि । रोहय । इमम् ॥४॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

VI.83.3 The malignant tumour, rooted in the veins, will fly away without producing another. The sceptic one will fly away and that morbid one will also vanish.

VI.83.4 O disease, may you flee away, heartily enjoying the oblation offered to you, which I heartily offer. Svāhā.

Nir-ṛti (Perdition)

VI.84.1 O you, in whose horrible mouth I sacrifice my happiness for the release of these bound ones - people consider you to be the earth but I know you thoroughly to be the distress (perdition) (Nir-ṛti).

VI.84.2 O (distress) present everywhere, may you accept our oblations. This is your share, which is within us. May you release these as well as those from the (bonds of) sin.

VI.84.3 O distress (perdition), not obstructing us, do loosen the iron-fetters (aṇkuśa), that bind us fast. The controller (death) verily gives, O man, back to me. Our homage be to that controller, the death. (Also Ṛg. VI.63.2)

VI.84.4 May you bind a man to the iron-peg, then in this world, he stays surrounded with deaths, which are thosands, (O distress divine); may you, in accord with the controller and the elders, raise this man to the highest sorrowless worlds. (Also see Av. VI.63.3)

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८५) पञ्चाशीतितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । वनस्पतिर्देवता । अनुष्टुप् छन्दः ॥

वरणो वारयाता अयं देवो वनस्पतिः ।
यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ॥१॥
इन्द्रस्य वर्चसा वयं मित्रस्य वरुणस्य च ।
देवानां सर्वेषां वाचा यक्ष्मं ते वारयामहे ॥२॥
यथा वृत्र इमा आपस्तस्तम्भ विश्वधा यतीः ।
एवा ते अग्निना यक्ष्मं वैश्वानरेण वारये ॥३॥

वरणः । वारयातै । अयम् । देवः । वनस्पतिः ।
यक्ष्मः । यः । अस्मिन् । आऽविष्टः । तम् । ऊं इति । देवाः । अवीवरन् ॥ १ ॥
इन्द्रस्य । वर्चसा । वयम् । मित्रस्य । वरुणस्य । च ।
देवानाम् । सर्वेषाम् । वाचा । यक्ष्मम् । ते । वारयामहे ॥ २ ॥
यथा । वृत्रः । इमाः । आपः । तस्तम्भ । विश्वधा । यतीः ।
एव । ते । अग्निना । यक्ष्मम् । वैश्वानरेण । वारये ॥ ३ ॥

(८६) षडशीतितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । एकवृषो देवता । अनुष्टुप् छन्दः ॥

वृषेन्द्रस्य वृषा दिवो वृषा पृथिव्या अयम् ।
वृषा विश्वस्य भूतस्य त्वमेकवृषो भव ॥१॥
समुद्र ईशे स्रवतामग्निः पृथिव्या वशी ।
चन्द्रमा नक्षत्राणामीशे त्वमेकवृषो भव ॥२॥
सम्राडस्यसुराणां ककुन्मनुष्याणाम् ।
देवानामर्धभागसि त्वमेकवृषो भव ॥३॥

वृषा । इन्द्रस्य । वृषा । दिवः । वृषा । पृथिव्याः । अयम् ।
वृषा । विश्वस्य । भूतस्य । त्वम् । एकऽवृषः । भव ॥ १ ॥
समुद्रः । ईशे । स्रवताम् । अग्निः । पृथिव्याः । वशी ।
चन्द्रमाः । नक्षत्राणाम् । ईशे । त्वम् । एकऽवृषः । भव ॥ २ ॥
सम्ऽराट् । असि । असुराणाम् । ककुत् । मनुष्याणाम् ।
देवानाम् । अर्धऽभाक् । असि । त्वम् । एकऽवृषः । भव ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vanaspatiḥ : A herb

VI.85.1 This divine fast-tree Varana (Varuṇa; Creataeva roxburghii) is a preventive remedy. May the enlightened ones cure the consumption that has entered this man.

VI.85.2 By the command of the replendent Lord, of the friendly Lord, of the venerable Lord, and with the speech of all the enlightend ones, we ward off your wasting disease.

VI.85.3 Just as the coverer (vṛtra) stopped and stilled these waters, nourisher of all, so with the fire, the benefactor of all men, I ward off your wasting disease.

Eka - vṛṣaḥ

VI.86.1 This man is the power (vṛṣā) of the resplendent Lord, the power of the heaven, the power of the earth, the power of all the beings. May you be the one and only powerful lord.

VI.86.2 The ocean is the lord of the streams, the fire has the sway over land; the moon is lord of the stars. May you be the one and only powerful lord.

VI.86.3 You are the sovereign of the life-enjoyers and apex of men; you are the part-sharer of the enlightened ones. May you be the one and only powerful lord.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८७) सप्ताशीतितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । ध्रुवो देवता । अनुष्टुप् छन्दः ॥

आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥१॥
इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलत् ।
इन्द्रेहैव ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥२॥
इन्द्र एतमदीधरद्ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधि ब्रवदयं च ब्रह्मणस्पतिः ॥३॥

आ । त्वा । अहार्षम् । अन्तः । अभूः । ध्रुवः । तिष्ठ । अविऽचाचलत् ।
विशः । त्वा । सर्वाः । वाञ्छन्तु । मा । त्वत् । राष्ट्रम् । अधि । भ्रशत् ॥ १ ॥
इह । एव । एधि । मा । अप । च्योष्ठाः । पर्वतःऽइव । अविऽचाचलत् ।
इन्द्रःऽइव । इह । ध्रुवः । तिष्ठ । इह । राष्ट्रम् । ऊं इति । धारय ॥ २ ॥
इन्द्रः । एतम् । अदीधरत् । ध्रुवम् । ध्रुवेण । हविषा ।
तस्मै । सोमः । अधि । ब्रवत् । अयम् । च । ब्रह्मणः । पतिः ॥ ३ ॥

(८८) अष्टाशीतितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । ध्रुवो देवता । (१–२) प्रथमाद्वितीययोर्ऋचोरनुष्टुप् , (३) तृतीयायाश्च त्रिष्टुप् छन्दसी ॥

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवासः पर्वता इमे ध्रुवो राजा विशामयम् ॥१॥
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥२॥
ध्रुवोच्युतः प्र मृणीहि शत्रूञ्छत्रूयतोधरान्पादयस्व ।
सर्वा दिशः संमनसः सध्रीचीर्ध्रुवाय ते समितिः कल्पतामिह ॥३॥

ध्रुवा । द्यौः । ध्रुवा । पृथिवी । ध्रुवम् । विश्वम् । इदम् । जगत् ।
ध्रुवासः । पर्वताः । इमे । ध्रुवः । राजा । विशाम् । अयम् ॥ १ ॥
ध्रुवम् । ते । राजा । वरुणः । ध्रुवम् । देवः । बृहस्पतिः ।
ध्रुवम् । ते । इन्द्रः । च । अग्निः । च । राष्ट्रम् । धारयताम् । ध्रुवम् ॥ २ ॥
ध्रुवः । अच्युतः । प्र । मृणीहि । शत्रून् । शत्रुऽयतः । अधरान् । पादयस्व । सर्वाः ।
दिशः । सम्ऽमनसः । सध्रीचीः । ध्रुवाय । ते । सम्ऽइतिः । कल्पताम् । इह ॥ ३ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dhruvaḥ

VI.87.1 O king, I have brought you here. Now you have entered inside. May you remain here firm and unremovable. May all the subjects be like you. May Your kingship never fail. (Also Yv. XII.11)

VI.87.2 Remain ever here. Do not be removed. Stay here seadfast just like the resplendent Lord and sustain here the kingdom.

VI.87.3 The resplendent Lord sustains him steady with unfailing offerings (supplies). May the blissful Lord and the Lord supreme bless and favour him.

Dhruvaḥ : Firm

VI.88.1 The sky is firm (dhruva); the earth is firm; and all this living world is firm. These mountains are firm and firm is this king of the people.

VI.88.2 May the sovereign venerable Lord be firm for you and the victorious (devaḥ) Lord supreme (Bṛhaspati) for you be firm. May the resplendent Lord and the adorable Lord keep your kingdom firm.

VI.88.3 Firm and unshaken slay your enemies. Put them down who behave like enemies. May all the regions be like-minded and accordant to you. May the war-council (assembly) enable you to remain firmly here.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८९) एकोननवतितमं सूक्तम्

(१–३) तृचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः । अनुष्टुप् छन्दः ॥

इदं यत्प्रेष्यः शिरो दत्तं सोमेन वृष्ण्यम् ।
ततः परि प्रजातेन हार्दिं ते शोचयामसि ॥१॥
शोचयामसि ते हार्दिं शोचयामसि ते मनः ।
